दिनाङ्कः-07.01.2026

प्रातः - 06:55

## उत्तरप्रदेशे मतदातृसूचिः

निर्वाचनायोगेन उत्तर-प्रदेशे विशेष-पुनरीक्षण-प्रक्रियायाः अनन्तरम् राज्यस्य प्रारूप-मतदातृ-सूचिः प्रकाशिता। इतः पूर्वं प्रारूप-मतदातृ-सूचेः प्रकाशनं विगते दिसम्बर-मासे एकत्रिंशे दिने निर्धारितम् आसीत्। उत्तर-प्रदेशस्य मुख्य-निर्वाचनाधिकारी नवदीप ऋणवा अवदत् यत् अस्यां सूच्यां पञ्च-विंशत्यधिक-षड्पञ्चाशदुत्तर-पञ्च-पञ्चाशत्-लक्षाधिक-द्वादशकोटि मतदातारः सम्मिलिताः सन्ति।

अमुना उक्तं यत् आपत्तिं प्रस्तोतुं फरवरी मासस्य षष्ठो दिवसः अन्तिमावधिः वर्तते। उत्तर-प्रदेशे मार्चमासस्य षष्ठे दिने परिष्कृता संशोधिता अन्तिमा च मतदातृ-सूचिः प्रकाशयिष्यते। ततः परं मतदातृसूच्यां कथमपि परिष्कारं नैव करिष्यते।

## रजतमहोत्सवस्य समापनसमारोहे

केन्द्रीयसूचना-प्रसारण- मन्त्री डा. एल्. मुरुगन वर्यः केरल-कौमुदी-दैनिकस्य वर्षपर्यन्तं कोट्टयम्-संस्करणस्य रजतमहोत्सवस्य समापनसमारोहे भागम् अगृह्णात्। जनसमूहं सम्बोधयन् मन्त्री केरल-कौमुदी-इत्यस्य कोट्टयम्-संस्करणस्य पंचविंशति वर्षाणि अभवत् एतदर्थं वर्धापनानि ज्ञापितवान्। सः मलयाळम्-पत्रकारीयक्षेत्रे अस्य पत्रस्य दीर्घकालस्योगदानं अपि स्मृतवान् ।

## जयशङ्करः फ्रान्स्-लक्सम्बर्ग्-देशयोः षड् दिवसीय यात्रायाः

विदेशमन्त्री डा. एस्. जयशङ्करः अवदत् यत्, लक्सम्बर्ग-देशः भारतस्य अत्यन्तं महत्त्वपूर्ण-सहभागित्वेन वर्तते , यत्र फिन्टॆक्, स्पेस् तथा आर्टिफिसियल् इन्टेलिजेन्स् इति कृत्रिम बुद्धिमत्ता इत्यादिषु क्षेत्रेषु सहकारस्य विस्तारस्य च प्रबला सम्भावना अस्ति। डा. जयशङ्करः फ्रान्स्-लक्सम्बर्ग्-देशयोः षड् दिवसीय यात्रायाः भागरूपेण लक्सम्बर्ग्-देशस्य प्रवासकाले उक्तवान्। सः लक्सम्बर्ग्-देशस्य प्रधानमन्त्रिणा ल्यूक् फ्रैडेन् इत्यनेन सह, उपप्रधानमन्त्रिणा

विदेशमन्त्रिणा च जेवियर् बेट्टेल् इत्यनेन सहापि वार्तालापं कृतवान्। डा. जयशङ्करः अवदत् यत् लक्सम्बर्ग् न केवलं द्विपाक्षिकसहभागीरूपेण अपितु यूरोपीयसङ्घस्य अन्तः अपि, विशेषतः भारत-यूरोपीयसङ्घस्य सम्बन्धान् सुदृढं कर्तुं महत्त्वपूर्णसमये, बहुमूल्य-भूमिकां निर्वहति। स्वयात्रायां डा. जयशङ्करः लक्सम्बर्ग्-नगरे भारतीयसमुदायस्य सदस्यैः सह अपि संवादं करिष्यति।

## फ़ैशन-टेक्नालजी

राष्ट्रीय फ़ैशन-टेक्नालजी संस्थान निफ्ट इत्यनेन फ़ैशन्-विन्यासस्य, प्रबन्धनस्य, तन्त्रज्ञानस्य च विभिन्नेषु स्नातक-स्नातकोत्तर-पाठ्यक्रमेषु आवेदनपत्राणां आवेदनस्य अन्तिम दिनाङ्कः अस्य मासस्य त्रयोदश दिनाङ्कपर्यन्तं विस्तारितः।

## ओपन्-सूपर्-750 बेडमिंटन

भारतस्य लक्ष्यसेनः अद्य कुआलालम्पुरे मलेशिया-ओपन्-सूपर्-750 बेडमिंटन - स्पर्धा मालिकायां पुरुष- एकल -क्रीडायाः द्वितीये चरणे हाङ्ग्-काङ्ग्-देशस्य ली-च्यूक -यीयू इत्येतं सम्मुखीकरोति। इतः प्राक् लक्ष्य सेनः सिंगापुरस्य जिया हेंग जेसन तेह इत्येनं एक विंशतिः - षोडश, पंचदश - एकविंशतिः, एकविंशतिः - चतुर्दश इत्यंकातरालेन पराजित्य पुरुषैकल वर्गे द्वितीयचक्रे प्रविष्टः।

।।इति वार्ता:।।